विशेषः । स तु अथर्ववेदान्तर्गतः । यथा, मुक्तिकोपनिषदि ।
"त्रिपुरातापनं देवी त्रिपुराकटभावना ॥")

देवीकोटः, पुं, (देव्याः कोटो दुर्गमिव ।) वाणपुरम् । इति त्रिकाण्डशेषः ॥

देवेज्यः, पुं, (देवानामिज्यः पूज्यः ।) बृहस्पतिः । इति शब्दरत्नावली ॥

देवेष्टः, पुं, (देवानामिष्टः प्रियः ।) महामेदा । गुग्गुलुः । इति राजनिर्घण्टः ॥ देववाञ्छिते, त्रि ॥

देवेष्टा, स्त्री, (देवानामिष्टा ।) वनबीजपूरकः । इति राजनिर्घण्टः ॥

देवोद्यानं, क्ली, (देवानां उद्यानं वनम् ।) देवानां वनम् । तद्यथा । वैभ्राजम् । मिश्रकम् । शिश्रकारणम् । चैत्ररथम् । इति त्रिकाण्डशेषः ॥

देशः, पुं, (दिश्यते निर्द्दिश्यते इति । दिश निर्द्देशे + कर्म्मणि घञ् ।) भूगोलभागविशेषः । इति सिद्धान्तमञ्जरी ॥ जनपदे जनपदसमुदाये जनपदैकदेशे सजलनिर्जलस्थानमात्रे च । इत्यमरटीकायां भरतः ॥ स त्रिविधः । जाङ्गलः अनूपः साधारणश्च । तत्पर्य्यायः । जनपदः १ नीवृत् २ विषयः ३ उपवर्त्तनम् ४ । इति राजनिर्घण्टः ॥ प्रदेशः ५ राष्ट्रम् ६ । इति शब्दरत्नावली ॥ * ॥ अथ देशे वर्णनीयानि । रत्नम् १ खनिः २ द्रव्यम् ३ पण्यम् ४ धान्यम् ५ करोद्भवः ६ दुर्गग्रामः ७ जनाधिक्यम् ८ नदीमातृकतादि ॥ * ॥ अथ ग्रामे वर्णनीयानि । धान्यम् १ लता २ वृक्षः ३ सरः ४ पशुपुष्टिः ५ क्षेत्रम् ६ अरघट्टः ७ केदारः ८ ग्रामेयीसुखम् ९ विभ्रमः १० । इति कविकल्पलता ॥ * ॥
अथ मध्यदेशीयजनपदा यथा,—
"तास्विमे कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः ।
शूरसेना भद्रकारा बोधकाः सपटच्चराः ॥
मत्स्याः किराताः कुल्याश्च कुन्तयः कान्तिकोशलाः ।
आवन्ताश्च सुलिङ्गाश्च लोकाश्चैवान्धकैः सह ॥
मध्यदेश्या जनपदाः प्रायशः परिकीर्त्तिताः ॥"
अथ उदीच्या देशा यथा,—
"वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ।
परन्ध्राश्चैव शूद्राश्च पह्लवाश्चात्मखण्डिकाः ॥
गान्धारा जवनाश्चैव सिन्धुसौवीरमद्रकाः ।
शका द्रुह्याः पुलिन्दाश्च पारदा हारमूर्त्तिकाः ॥
रामठाः कण्ठकाराश्च केकया देशमानिकाः ।
क्षत्त्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ॥
आत्रेयोऽथ भरद्वाजः प्रस्थलाः सदशेरकाः ।
लम्पकास्तलगानाश्च सैनिकाः सह जाङ्गलैः ॥
एते देशा उदीच्यास्तु प्राच्यान्देशान्निबोधत ॥"
अथ प्राच्या देशा यथा,—
"अङ्गवङ्गा मद्गुरका अन्तर्गिरिबहिर्गिराः ।
ततः प्रवङ्गा मातङ्गा मलया मलवर्त्तकाः ॥
सुह्मोत्तराः प्रविजया भार्गवाङ्गेयमालवाः ।
प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः ॥
शाल्वा मागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः ॥"
अथ दक्षिणापथदेशा यथा,—
"तथापरे जनपदा दक्षिणापथवासिनः ।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च ॥
सेतुका मुषिकाश्चैव कुमयाश्वारवासिकाः ।
नवराष्ट्रा माहिषका कलिङ्गाश्चैव सर्व्वशः ॥
कावेराश्च सहैषीकैराटव्याः शवरास्तथा ।
पुलिन्दा विन्ध्यमूषीका वैदर्भा दण्डकैः सह ॥
कुलीयाश्च शिरालाश्च रूपसास्तापसैः सह ।
तथा तैत्तिरकाश्चैव सर्व्वे कारस्करास्तथा ॥
नासिकाद्याश्च ये चान्ये ये चैवान्तरनर्म्मदाः ।
भानुकच्छाः समाहेयाः सह सारस्वतैस्तथा ॥
कच्छीयाश्च सुराष्ट्राश्च आनर्त्ताश्चार्व्वुदैः सह ।
इत्येते अपरान्ताश्च शृणु ये विन्ध्यवासिनः ॥"
अथ विन्ध्यवासिदेशा यथा,—
"मालवाश्च करूषाश्च मेकलाश्चोत्कलैः सह ।
उत्तमार्णा दशार्णाश्च भोजाः किष्किन्धकैः सह ॥
तोषलाः कोशलाश्चैव त्रैपुरा वैदिकास्तथा ।
तुमुरास्तुम्बुराश्चैव पटुमा निषधैः सह ॥
अनूपास्तुण्डिकेराश्च वीतिहोत्रा अवन्तयः ॥
एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः ॥"
पर्व्वताश्रयिदेशा यथा,—
"अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये ।
निहारा हंसवर्गाश्च कुपथा अपथाः खशाः ॥
कुथप्रावरणाश्चैव ऊर्णा दर्भाः समूहकाः ।
त्रिगर्त्ता मण्डलाश्चैव किराताश्चामरैः सह ॥"
इति मत्स्यपुराणम् ॥
अपि च ।
"देशव्यवस्था देवेशि ! कथ्यते शृणु तत्परा ।
वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे ! ॥
तावदङ्गाभिधो देशो यात्रायां न हि दुष्यति ।
रत्नाकरं समारभ्य ब्रह्मपुत्त्रान्तगं शिवे ! ।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः ॥
जगन्नाथात् पूर्व्वभागात् कृष्णातीरान्तगं शिवे ।
कलिङ्गदेशः संप्रोक्तो वाममार्गपरायणः ॥
कलिङ्गदेशमारभ्य पञ्चाशद्योजनं शिवे ! ।
दक्षिणस्यां महेशानि ! कालिङ्गः परिकीर्त्तितः ॥
सुब्रह्मण्यं समारभ्य यावद्देवो जनार्द्दनः ।
तावत् केरलदेशः स्यात् तन्मध्ये सिद्धकेरलः ॥
रामेश्वरात् चक्रटेशात् हंसकेरलनामकः ।
अनन्तशैलमारभ्य यावत् स्यादव्ययं परे ॥
तावत् सर्व्वशनामा तु केरलः परिकीर्त्तितः ।
शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम् ॥
तावत् काश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकम् ॥
कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम् ॥
कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि ।
त्रिपञ्चकं समारभ्य मध्ये चोज्जयिनी शिवे ! ॥
मार्ज्जारितीर्थं राजेन्द्र ! कोलापुरनिवासिनी ।
तावद्देशो महाराष्ट्रः कर्णाटस्वामिगोचरः ॥
जगन्नाथादूर्द्ध्वभागमर्व्वाक् श्रीभ्रमरात्मिकात् ।
तावदन्ध्राभिधो देशः सौराष्ट्रं शृणु सादरम् ॥
कोङ्कणात् पश्चिमं तीर्थं समुद्रप्रान्तगोचरम् ।
हिङ्गुलान्तात्मको देवि ! दशयोजनदेशतः ॥
सौराष्ट्रदेशो देवेशि ! तस्मात्तु गुर्ज्जराभिधः ।
श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः ॥
तैलङ्गदेशो देवेशि ! ध्यानाध्ययनतत्परः ।
सुराम्बिकां समारभ्य मलयाद्र्यन्तगं शिवे ! ।
मलयालाभिधो देशो मन्त्रसिद्धिप्रवर्त्तकः ।
रामनाथं समारभ्य श्रीरङ्गान्तं विलेश्वरि ! ॥
कर्णाटदेशो देवेशि ! साम्राज्यभोगदायकः ।
ताम्रपर्णीं समासाद्य शैलाद्रिशिखरोद्गतः ॥
अवन्तीसंज्ञको देशः कालिका तत्र तिष्ठति ।
भद्रकालीमहापूर्व्वं रामदुर्गाच्च पश्चिमे ।
श्रीविदर्भाभिधो देशो वैदर्भी तत्र तिष्ठति ॥
गुर्ज्जरात् पूर्व्वभागे तु द्वारकातो हि दक्षिणे ।
मरुदेशो महेशानि ! उष्ट्रोत्पत्तिपरायणः ॥
श्रीकोङ्कणादधोभागे तापीतः पश्चिमे परे ।
आभीरदेशो देवेशि ! विन्ध्यशैले अवस्थितः ॥
अवन्तीतः पूर्व्वभागे गोदावर्य्यास्तथोत्तरे ।
मालवाख्यो महादेशो धनधान्यपरायणः ॥
द्रविड़तैलङ्गयोर्म्मध्ये चोलदेशः प्रकीर्त्तितः ।
लम्बकर्णाश्च ते प्रोक्तास्तद्देशो वान्तरे भवेत् ॥
कुरुक्षेत्रात् पश्चिमे तु तथा चोत्तरभागतः ।
इन्द्रप्रस्थान्महेशानि ! दशयोजनकद्वये ॥
पाञ्चालदेशो देवेशि ! सौन्दर्य्यगर्व्वभूषितः ।
पाञ्चालदेशमारभ्य म्लेच्छाद्दक्षिणपूर्व्वतः ॥
काम्बोजदेशो देवेशि ! वाजिराशिपरायणः ।
वैदर्भदेशादूर्द्ध्वञ्च इन्द्रप्रस्थाच्च दक्षिणे ॥
मरुदेशात् पूर्व्वभागे वैराटः परिकीर्त्तितः ।
काम्बोजाद्दक्षभागे तु इन्द्रप्रस्थाच्च पश्चिमे ॥
पाण्ड्यदेशो महेशानि ! महाशूरत्वकारकः ।
गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे ! ॥
विदेहभूः समाख्याता तैरभुक्ताभिधः स तु ।
काम्बोजदेशमारभ्य महाम्लेच्छात्तु पूर्व्वके ।
वाह्लीकदेशो देवेशि ! अश्वोत्पत्तिपरायणः ।
तप्तकुण्डं समारभ्य रामक्षेत्रान्तकं शिवे ! ।
किरातदेशो देवेशि ! विन्ध्यशैलेऽवतिष्ठते ॥
करतोयां समारभ्य हिङ्गुलाजान्तकं शिवे ! ।
मुलतानदेशो देवेशि ! महाम्लेच्छपरायणः ॥
हिङ्गुपीठं समारभ्य मक्केशान्तं महेश्वरि ! ।
खुरासानाभिधो देशो म्लेच्छमार्गपरायणः ॥
तन्मध्ये चोत्तरे देवि ! ऐराकः परिकीर्त्तितः ।
काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे ।
भोटान्तदेशो देवेशि ! मानसेशाच्च दक्षिणे ॥
मानसेशाद्दक्षपूर्व्वे चीनदेशः प्रकीर्त्तितः ।
कैलाशीरं समारभ्य सरयूं परितः परे ॥
अमरगा महेशानि महाचीनाभिधो भवेत् ।
जटेश्वरं समारभ्य योगिन्यन्तं महेश्वरि ! ॥
नेपालदेशो देवेशि ! शिलहट्टं शृणु प्रिये ! ।
गणेश्वरं समारभ्य महोदध्यन्तगं शिवे ! ॥
शिलहट्टाभिधो देशः पर्व्वते तिष्ठति प्रिये ! ।
वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे ! ॥